संस्कृतवार्ता:
19.06.2024
सायम् - 06:20

मुख्यवार्ता:

· प्रधानमंत्री नरेन्द्र-मोदी अद्य बिहारस्य राजगीर-स्थले नालन्दा-विश्वविद्यालयस्य नवनिर्मित-परिसरस्य उद्घाटनम् अकरोत्। उक्तं च यत् भारतं निज-शिक्षां ज्ञानप्रणालीं च सुदृढां विधाय महाशक्ते: स्थानं प्राप्तुं शक्नोति।

· प्रधानमन्त्री-नरेन्द्र-मोदी उक्तवान् यत् केन्द्रप्रशासनं रक्ताल्पतारोग-सम्बद्धानां समाह्वानानां निवारणाय प्रौद्योगिक्या: प्रबलतया अधिकाधिकं मात्रया च प्रयोगं विदधाति।

· सिक्किम-प्रदेशे जलप्लावित-क्षेत्रेषु साहाय्योध्दार-कार्याणि रक्षाभियानञ्च द्रुतगत्या प्रवर्तते।

· समेधमान-वृष्ट्या असमे अरुणाचले च जनजीवनं दुष्प्रभावितं वर्तते।

· आई.सी.सी. इत्यस्यां पुरुषाणां विंशतिप्रतिविंशति: विश्व-चषक-क्रिकेट-प्रतिस्पर्धायाम् अद्य दक्षिणाफ्रीकादलस्य सामुख्यम् अमरीकादलेन साकं भविष्यति।

प्रधानमन्त्री-बिहारे

प्रधानमंत्री नरेन्द्र-मोदी अद्य बिहारस्य राजगीर-स्थले नालन्दा-विश्वविद्यालयस्य नवनिर्मित-परिसरस्य उद्घाटनम् अकरोत्। अत्रावसरे प्रधानमन्त्री अवोचत् यत् ज्ञानं सप्त-चत्वारिंशदुत्तर-द्विसहस्र-वर्षं यावत् भारतं विकसित राष्ट्रं कर्तुं महत्त्वपूर्णां भूमिकां निभालयिष्यति। नालन्दा विश्वविद्यालय-परिसरस्य उद्घाटनानन्तरं सुषमा स्वराज-सभागारे छात्रान् सङ्काय-सदस्यान् च सम्बोधयन् प्रधानमन्त्री अवोचत् यत् भारतं निज-शिक्षां ज्ञानप्रणालीं च सुदृढां विधाय महाशक्ते: स्थानं प्राप्तुं शक्नोति। अमुना उक्तं यत् नालन्दा विश्वविद्यालय: जगति अस्माकम् अस्मिताया: परम्परणां च बृहत्तमम् उदाहरणं वर्तते। नालन्दा-विश्वविद्यालयस्य नूतन-स्वरूपं उदीयमान-भारतस्य क्षमताया: शक्तेश्च प्रतीकं विद्यते। श्रीमोदिना उक्तं यत् तदीयं प्रशासनं भारताय शिक्षा क्षेत्रे बृहत्तम-ज्ञानकेन्द्र-रुपेण स्थापयितुं कार्यम् आचरति। अत्रावसरे विदेशमन्त्री एस.जयशङ्कर: अवदत् यत् शिक्षा प्रशिक्षणं क्षमता-निर्माणं च अन्ताराष्ट्रिय-दृष्टिकोणं समेधितुं प्रभावपूर्णोपाया: विद्यन्ते। अस्मिन् अवसरे बिहारस्य मुख्यमन्त्री नीतिश-कुमार: उपराज्यपाल: राजेन्द्र-आर्लेकर: उपमुख्यमन्त्रिणौ सम्राट-चौधरी विजय-सिन्हा अन्ये प्रतिनिधय: सप्तदश राष्ट्राणां राजदूता: च उपस्थिता: आसन्।

विश्व-सिकल-सेल

प्रधानमन्त्री-नरेन्द्र-मोदी उक्तवान् यत् केन्द्रप्रशासनं रक्ताल्पतारोग-सम्बद्धानां समाह्वानानां निवारणाय प्रौद्योगिक्याः प्रबलतया अधिकाधिकं मात्रया च प्रयोगं विदधाति। अद्य विश्व-रक्ताल्पता-रोग-दिवसावसरे उतवा सिकल-सेल इत्याख्ये अवसरे श्रीमोदिना रोगमुम् नियत्रितुं प्रशासनस्य प्रतिबद्धता पुनरावर्तिता। एकस्मिन् सामाजिक-सञ्चार-पटले असौ न्यगदत् यत् प्रशासनेन विगतवर्षे राष्ट्रिय-सिकल-सेल-रक्ताल्पताभियानं समारब्धम्। अपि च तत्सम्बद्धे जागरूकतां प्रबलीकर्तुं समुचितोपचारं रोगस्य त्वरिताभिज्ञानं च इत्यादिषु विषयेषु कार्यमपि विधीयते। अत्रावसरे स्वास्थ्यमन्त्रिणा जगत-प्रकाश-नड्डा इत्यनेन प्रोदीरितं यत् प्रशासनं शीघ्रमेन निदानं संवर्धयितुं उपचारप्रापणाय रोगीणाञ्च उपचारार्थं ध्यानं प्रददाति।

सिक्किम-जलप्लाव:

सिक्किम-प्रदेशे जलप्लावित-क्षेत्रेषु साहाय्योध्दार-कार्याणि रक्षाभियानञ्च द्रुतगत्या प्रवर्तते। मंगन-जनपदस्य लांचुग-चुंगथांग-प्रभावित-क्षेत्रयो: त्रिशतोत्तरैक-सहस्रं पर्यटका: सुरक्षित-स्थानेषु सम्प्राप्ता: सन्ति। मंगन-जनपदाधिकारी हेम-कुमार-छेत्री आकाशवाणीं संसूचितवान् यत् अवरूद्ध-पर्यटकानां निष्कासन-कार्यम् अद्य सम्पूरयिष्यते। तत्रैव असमराज्ये सततं जायमानया वृष्ट्या अनेकेषु जनपदेषु समान्यं जनजीवनं प्रभावितं जातम्। अनया अत्यधिक-वृष्ट्या पञ्चदश-जनपदानां सार्धेक-लक्षजना: संकटग्रस्ता: विद्यन्ते । ह्य: रात्रौ करीमगंज-जनपदे भूस्खलनेन पञ्चजना: दिवंगता:। अस्य जनपदस्य सर्वे विद्यालया: अद्य श्व: च पिहिता:। गुवाहाट्यामपि जलभरणस्य सूचनास्ति। जलप्लावितेषु विविधेषु जनपदेषु पथ-सञ्चार-सेवापि बाधिता भवति। एतदतिरिच्य अरुणाचल-प्रदेशे भारतर्तु-विज्ञान-विभागेन पूर्वीय-कामेंग-पापुमपारे-दिबांग-उपत्यका-जनपदेषु रक्तवार्णिकी जनसञ्चेतना प्रसारिता। नवदशच जनपदेभ्य: नारङ्गवार्णिकी शेषेभ्यश्च पीतवार्णिकी संचेतना प्रदत्ता। अवधेयं वर्तते यत् कार्सिंगसा क्षेत्रे सहसागतेन जलप्लावनेन राष्ट्रिय-राजमार्गस्य पञ्चदशाधिक-चतुश्शतम् इत्यस्य एको भाग: निमग्नो जात:। येन हि यातायातसेवा पूर्णतया स्थगिता अभवत्।

वित्तमन्त्री

वित्तमन्त्रिणा निर्मला-सीतारामन् इत्यनया अद्य नवदिल्ल्यां सामान्यं चतुर्विंशत्यधिक-द्वि-सहस्र-पञ्चविंशत्यधिक-द्वि-सहस्र-तमवर्षयो: अर्थसंकल्प-पत्रं निधाय प्रमुखै: अर्थशास्त्रज्ञै: परामर्शस्य प्रथमचरणस्य अध्यक्षता कृता। एतस्मिन् आध्यक्षयुते सत्रे केन्द्रीय वित्तराज्यमन्त्री पंकजा-चौधरी वित्तसचिव: वित्तमन्त्रालस्य विभागानां सचिवा: राजस्वाधिकारिण: मुख्यार्थिक-परामर्शदाश्च सम्मिलिता: अभवन्।

चिरागपासवान-विश्वखाद्य-भारतं

केन्द्रीय-खाद्य-प्रसंस्करणोद्योगमन्त्री चिराग-पासवान: अद्य नवदिल्ल्यां विश्व-खाद्य-भारतं चतुर्विंशत्यधिकद्विसहस्रं सम्बोधयन् प्रोक्तवान् यत् खाद्य-प्रसंस्करण-क्षेत्रे सीमरहिता: सम्भावना: वर्तन्ते। अपि च आभि: सम्भावनाभि: कृषकाणाम् आयसंवर्धनं विकसित-भारतस्य स्वप्नपूरणं च भविष्यति। श्री-पासवान: अवोचत् यत् खाद्यपदार्थानां निर्मलता गुणवत्ता-परीक्षणं वैश्विकमानकानां पूर्ति: च प्रशासनस्य प्राथमिकता: भविष्यन्ति।

दिल्ली जलसङ्कटम्

राजधान्यां नव-दिल्ल्यां जल-सङ्कटम् अनवरतं प्रवर्तते। टैंकर इति जल-सञ्चय-वाहनेभ्यः जल-वितरण-केन्द्रेषु जनानां सुदीर्घ-पङ्क्तयो विद्यन्ते। अनेन कारणेन दिल्ल्यां स्थाने-स्थाने विरोध-प्रदर्शनं राजनीतिकोहापोहश्च दृश्यन्ते । नव-दिल्ली नगर-पालिका-परिषद्-क्षेत्रम् अपि जल-नैयून्य-प्रभावितं वर्तते। परिषदः उपाध्यक्षः सतीश उपाध्यायः वार्ताहरैः सह संवादे दिल्ली-प्रशासनं विरुध्य टैंकर-टेंडर-माफिया इत्येतयो: संरक्षणस्य भ्रष्टाचारस्य च आरोपान् आरोपयत्। अमुना जनाः आवासीय-प्रखण्डाः च जलस्य विवेक-पूर्णोपयोगाय निवेदिताः। अत्रान्तरे दिल्ली-सर्वकारेण आरोपितं यत् हरियाणायाः भाजपा-प्रशासनं राजनीतिक-विंसङ्गति-वशात् दिल्ल्याः जलापूर्तिम् अवरोधयति। दिल्ल्याः जल-मन्त्री आतिशी वार्ताहरान् सम्बोधयन्ती उक्तवती यत् विषयेस्मिन् प्रधानमन्त्रिणे पत्रं विलिख्य शीघ्रं हस्तक्षेपस्य अध्यर्थना कृता। येन अस्याः समस्याः समाधानं भवेत्।

भारतर्तुविज्ञानविभाग:

ऋतु-विज्ञान-विभागेन संसूचितं यत् पश्चिमीय विक्षोभकारणेन उत्तरभारतं श्व आरभ्य अस्य मासस्य एकविंशति-दिनांकं यावत् भीषणोष्णप्रकोपात् शैथिल्यं प्राप्स्यति। आकाशवाणीं संसूचयन् ऋतु-वैज्ञानिक: आर.के. जेनामणि: अकथयत् यत् राष्ट्रियराजधान्याम् अद्य समंकिते तापमाने एकत: द्वि-डिग्रीसेल्सियसमितं यावत् अपचिते: अनुमानमिस्त। असौ अग्रे प्रख्यापितवान् यत् नव-षष्ट्यधिक-नवदशतम् वर्षात् अनेन नगरेण अति-ऊष्णयुता रात्रि: अनुभूता।

## हजयात्रा-आतप:

प्रबलातपेन पञ्चशत् डिग्री सेल्सियस् इत्यत: अधिक-तापमानेन च सार्धपञ्च-शताधिका: हजयात्रिण: मृत्युमुपगता:। मिस्र देशे विंशत्यधिक-त्रिशतं यात्रिण: निदाघेन तत्सम्बद्ध-रोगप्रभावेण च मृता:। जोर्डन देशस्य राजनयिक-सूत्राणाम् अनुसारम् तत्र षष्टि-जना: मृता:। मृतकानां सङ्ख्या इतोपि वर्धितुं शक्यते।

## आई.सी.सी क्रिकेट

आई.सी.सी. इत्यस्यां पुरुषाणां विंशतिप्रतिविंशति: विश्व-चषक-क्रिकेट-प्रतिस्पर्धायाम् अद्य सर्वाच्च अष्टचरणं सज्जं वर्तते। भारतीय-समयानुसारं रात्रौ अष्टवादने सर-विवियन-रिचर्ड-क्रीडाङ्गणे दक्षिणाफ्रीकादलस्य सामुख्यम् अमरीकादलेन साकं भविष्यति। भारतीय दलमपि श्व: ब्रिज-टाउन-नगरे अफगानिस्तान दलं विरुध्य क्रीडार्थं तत्परं वर्तते।

## महिला क्रिकेट्

महिलानां क्रिकेट-क्रीडायां भारत-दक्षिण-अफ्रीका-दलयोः एकदिवसीय-क्रिकेट-शृङ्खलायाः द्वितीया-स्पर्धा अद्य बङ्गलुरु-नगरस्य एम. चिन्नास्वामी क्रीडाङ्गणे प्रवर्तते। भारतीय-दलेन प्रथमं निर्धारितेषु पञ्चाशत् क्षेपचक्रेषु सपाद-त्रिशतं धावनाङ्कानां विजयलक्ष्यं स्थापितम्। अन्तिम-वार्ताः लेखन-समयं यावत् दक्षिण-अफ्रिकादलेन …….. क्षेपचक्रेषु ………. धावनाङ्काः समर्जिताः।

।। इति वार्ता: ।।